# सत्यमेव जयते

**(उपसर्गप्रयोग:)**

एकदा कस्यचित् धनिकस्य धनस्यूत: नष्ट: । अत: स: सम्बादपत्रद्वारा घोषणां कृतवान् - ''स्यूतमध्ये द्विलक्षरूप्यकाणि सन्ति । य: स्यूतं **प्रत्यर्पयिष्यति**, तस्मै लक्षं रूप्यकाणि प्रदास्यामि । सौभाग्यात् तत् धनस्यूतं कश्चित् श्रमिक: **प्राप्तवान्** । स: दरिद्र: अपि सत्यपरायण: आसीत् । अत: स: धनिकगृहम् **उपगच्छति** स्म । धनिकाय स्यूतं प्रदाय **प्राणमत्** । धनिक: तु स्वप्रतिश्रुतिं **विस्मरति** स्म । श्रमिकाय किञ्चिदपि न दातुं चिन्तितवान् । अत: स: श्रमिकम् उक्तवान् - भो: ! मम धनस्यूतमध्ये रूप्यकै: सह बहुमूल्यं रत्नम् आसीत्, भवान् तत् **प्रददातु** । अहं तुभ्यं लक्षं रूप्यकाणि उपहरिष्यामि । स्यूतमध्ये रत्नं नासीत् इति श्रमिक: सत्यम् अवदत् । अत: कलहस्य समाधानाय उभौ विचारालयम् **आगच्छताम्** । न्यायाधीश: उभयो: आक्षेपं श्रुत्वा धनिकं **प्रत्यवदत्** - भो: श्रेष्ठिन् ! भवान् कथयति यत् स्यूतमध्ये रूप्यकै: सह रत्नम् आसीत् । अत: धनस्यूत: भवत: न भवति । एतस्मिन् धनस्यूते तु केवलं रूप्यकाणि सन्ति । यावत् कश्चित् स्यूताधिकारी नागच्छति, तावत् धनस्यूत: श्रमिकसमीपे स्थास्यति । एतेन धनिक: विचलित: अभवत् । स: सत्यम् उक्तवान्, स्वदोषं च स्वीकृतवान् । विचारानुसारं धनिक: श्रमिकाय लक्षं रूप्यकाणि प्रदत्तवान् । सत्यनिष्ठ: श्रमिक: आनन्देन गृहं **प्रत्यागच्छत्** ।

| |
|---|
| **धनस्यूत:, प्रत्यर्पयिष्यति, प्राणमत्, उपहरिष्यामि, स्यूताधिकारी, स्वीकृतवान्, प्रत्यागच्छत्** |

## टिप्पणी

**शब्दार्थ: -**

धनस्यूत: - धनकोश: (ପଇସାମୁଣି), नष्ट: - भ्रष्ट: (ହଜିଯାଇଛି), प्रत्यर्पयिष्यति - प्रत्यर्पणं करिष्यति (ଫେରାଇଦେବ), उपगच्छति स्म- समीपम् अगच्छत् (ନିକଟକୁ ଗଲେ), उक्तवान् - अवदत् (କହିଲେ), उपहरिष्यामि - उपहाररूपेण दास्यामि (ଉପହାରଦେବି), प्राणमत् - प्रणामम् अकरोत् (ପ୍ରଣାମ କଲେ), न्यायाधीश: - विचारक: (ବିଚାରପତି), आक्षेपम्- परस्परं दोषारोपम् (ନିଜ ନିଜ ମଧ୍ୟରେ ଦୋଷାରୋପ), श्रेष्ठिन् - धनाधीश: (ଧନୀ), सत्यनिष्ठ: - सत्यव्रत: (ସତ୍ୟପରାୟଣ) ।

## अभ्यास :

- **उच्चैः पठत, लिखत ।**

**(क) उपसर्गविषयकाः नियमाः -** उपसर्गाः धातोः पूर्वं भवन्ति । ते च विंशतिसंख्यकाः सन्ति । यथा- प्र, परा, अप्, सम्, अनु, अव, निर् (निस्) दुर् (दुस्) अभि, वि, अधि, सु, उत् (उद्), अति, नि, प्रति, परि, अपि, उप, आ ।

**(ख)**

| **उसपर्गः** | **धातुः** | **क्रियापदम्** | **उपसर्गयुक्तक्रियापदम्** |
|---|---|---|---|
| आ | गम् | गच्छति | आगच्छति (ଆସୁଅଛି) |
| उप | हृ | हरति | उपहरति (ଉପହାର ଦେଉଛନ୍ତି) |
| प्र | दा | ददाति | प्रददाति (ପ୍ରଦାନ କରୁଅଛି) |
| अनु | कृ | करोति | अनुकरोति (ଅନୁକରଣ କରୁଅଛି) |
| वि | स्मृ | स्मरति | विस्मरति (ଭୁଲିଯାଉଛି) |
| प्र | नम् | नमति | प्रणमति (ପ୍ରଣାମ କରୁଅଛି) |
| अधि | वस् | वसति | अधिवसति (ବାସ କରୁଅଛି) |
| प्रति + आ | गम् | गच्छति | प्रत्यागच्छति (ଫେରୁଅଛି) |
| आ | हृ | हरति | आहरति (ଆହରଣ କରୁଅଛି) |
| वि | हृ | हरति | विहरति (ବିହାର/ଭ୍ରମଣ କରୁଅଛି) |
| सम् | हृ | हरति | संहरति (ସଂହାର କରୁଅଛି) |

**(ग) उपसर्गप्रयोगः**

| | | |
|---|---|---|
| बालकः गच्छति | - | बालकः आगच्छति । |
| शिक्षकः गच्छति | - | छात्रः शिक्षकम् उपगच्छति । |
| माता पुत्रं स्मरति | - | वृद्धः कथां विस्मरति । |
| माता कार्यं करोति | - | पुत्री मातरम् अनुकरोति । |

१. **योग्यपदेन शून्यस्थानं पूरयत ।**

**यथा :** छात्रः गृहम् आगच्छति (आ + गम्) लट् प्रथमपुरुष-एकवचने

तथैव लिखत -

(क) भक्ताः देवं ____________ । (प्र + नम्) लट् प्रथमपुरुष-बहुवचने

(ख) सः पाठं ____________ । (वि + स्मृ) लट् प्रथमपुरुष-एकवचने

(ग) माता शिशुं ____________ । (परि + पाल्) लट् प्रथमपुरुष-एकवचने

(घ) पशवः वनम् ____________ । (अधि + वस्) लट् प्रथमपुरुष-बहुवचने

(ङ) शिशुः मातरम् ____________ । (अनु + गम्) लट् प्रथमपुरुष-एकवचने

(च) धनिकः धनं ____________ । (प्र + दा) लट् प्रथमपुरुष-एकवचने

(छ) शिष्यः गुरुम् ____________ । (अनु + कृ) लट् प्रथमपुरुष-एकवचने

(ज) सर्पाः बिलात् ____________ । (निर् + गम्) लट् प्रथमपुरुष-बहुवचने

(झ) राजा शत्रून् ____________ । (सम् + हृ) लट् प्रथमपुरुष-एकवचने

(ञ) तौ प्रातः ____________ । (उत् + स्था) लट् प्रथमपुरुष-द्विवचने

(ट) वृद्धाः आसने ____________ । (उप + विश) लट् प्रथमपुरुष-बहुवचने

(ठ) प्रभातः निहारं ____________ । (प्रति + वद्) लट् प्रथमपुरुष-एकवचने

(ड) दुर्जनः सदा ____________ । (अप + कृ) लट् प्रथमपुरुष-एकवचने

(ढ) मन्दिरे घण्टा ____________ । (नि + नद्) लट् प्रथमपुरुष-एकवचने

(ण) रामः कृष्णम् ____________ । (अभि + ज्ञा) लट् प्रथमपुरुष-एकवचने

२. **बन्धनीमध्यस्थयथार्थशब्देन शून्यस्थानं पूरयत ।**

(क) शिवः कैलासम् ____________ ।

(ख) कविः काव्यं ____________ ।

(ग) देवबाला देवं ____________ ।

(घ) गुरुः शिष्यं ____________ ।

(ङ) छात्रः गुरुं ____________ ।

(च) वृद्धः गृहात् ____________ ।

(छ) सर्पः वल्मीकात् ____________ ।

(ज) बालाः उद्याने ____________ ।

(झ) सज्जनः जनान् ____________ ।

(ञ) हिमालयात् गंगा ____________ ।

**(उपकरोति, प्रणमति, प्रभवति, परिपृच्छति, निःसरति,**

**आह्वयति, निर्गच्छति, अधिवसति, विहरन्ति, विरचयति)**

३. **एकपदेन उत्तरं लिखत ।**

(क) कस्य धनस्यूतः नष्टः ?

(ख) स्यूतमध्ये कति रूप्यकाणि आसन् ?

(ग) धनिकः विचलितः सन् किम् उक्तवान् ?

(घ) कः धनस्यूतं प्राप्तवान् ?

(ङ) कः श्रमिकाय लक्षं रूप्यकाणि प्रदत्तवान् ?

४. **बन्धनीमध्यस्थयथार्थशब्दैः शून्यस्थानानि पूरयत ।**

(क) धनिकः प्रतिश्रुतिं ____________ । (आस्मरति, विस्मरति, अपस्मरति)

(ख) स्यूतमध्ये द्विलक्षं रूप्यकाणि ____________ । (आसीत्, आस्ताम्, आसन्)

(ग) धनिकाय ____________ प्रदाय प्राणमत् । (धनं, स्यूतं, रत्नं)

(घ) श्रमिकः ____________ गृहं प्रत्यागच्छत् । (दुःखेन, गर्वेण, आनन्देन)

(ङ) उभौ विचारालयं ____________ । (आगच्छत्, आगच्छताम्, आगच्छन्)

५. **मातृभाषया अनुवादं कुरुत ।**

(क) स्यूतमध्ये द्विलक्षरूप्यकाणि सन्ति ।

(ख) धनिकः स्वप्रतिश्रुतिं विस्मरति स्म ।

(ग) अहं तुभ्यं द्विलक्षरूप्यकाणि उपहरिष्यामि ।

(घ) श्रमिकाय किञ्चिदपि न दातुं चिन्तितवान् ।

(ङ) श्रमिकः आनन्देन गृहं प्रत्यागच्छत् ।

**६. शुद्धशब्दं रचयत ।**

(क) र ति उ ह प - .....................

(ख) ल वि रा चा यः - .....................

(ग) धी या न्या शः - .....................

(घ) त्य प णः रा स य - .....................

(ङ) ति र्प प्र त्य यि ष्य - .....................

**७. स्तम्भमेलनं कुरुत ।**

| **'क' स्तम्भः** | **'ख' स्तम्भः** |
|---|---|
| धनिकः | समीपं गच्छति स्म |
| भवान् | अस्थिरः |
| उपगच्छति स्म | सत्यपरायणः |
| विचलितः | त्वम् |
| सत्यनिष्ठः | धनी |

**८. संशोधनं कुरुत ।**

(क) उभौ विचारालयम् आगच्छत् ।

(ख) रूप्यकाणां सह रत्नम् आसीत् ।

(ग) आनन्देन गृहं अप्रत्यागच्छत् ।

(घ) त्वं नदीं सन्तरसि ।

(ङ) धनिकस्य धनस्यूतम् नष्टः ।

**९. वाक्येषु व्यवहरत ।**

प्रणमन्ति, आनयसि, प्रत्यागच्छन्ति, तुभ्यम्, विस्मरति

●